श्री भद्रकाळी कवचं (जगन्मंगळं)

श्री भद्रकाळी कवचं (जगन्मंगळं)

श्रीदेव्युवाच |
भगवन् करुणांभोधे शास्त्रान् भो निधिपारगः |
त्रैलोक्यसारयेत्तत्त्वं जगद्रक्षणकारकः || 1 ||

भद्रकाळ्या महादेव्याः कवचं मंत्रगर्भकं |
जगन्मंगळदं नाम वद शंभो दयानिधे || 2 ||

श्रीभैरव उवाच |
भैं भद्रकाळीकवचं जगन्मंगळनामकं |
गुह्यं सनातनं पुण्यं गोपनीयं विशेषतः || 3 ||

जगन्मंगळनाम्नोऽस्य कवचस्य ऋषिः शिवः |
उष्णिक्छंदः समाख्यातं देवता भद्रकाळिका || 4 ||

भैं बीजं हूं तथा शक्तिः स्वाहा कीलकमुच्यते |
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तितः || 5 ||

अस्य श्रीजगन्मंगळनाम्नो भद्रकाळी कवचस्य शिव ऋषिः उष्णिक् छंदः श्रीभद्रकाळी देवता भैं बीजं हूं शक्तिः स्वाहा कीलकं धर्मार्थकाममोक्षार्थे कवच पाठे विनियोगः |

अथ ध्यानं |
उद्यच्चंद्रकळावतंसित शिखां क्रींकारवर्णोज्ज्वलां
श्यामां श्याममुखीं रवींदुनयनां हूंवर्णरक्ताधरां |
भैं बीजांकित मानसां शवगतां नीलांबरोद्भासितां
स्वाहालंकृत सर्वगात्रलतिकां भैं भद्रकाळीं भजे ||

अथ कवचं |
ॐ | भैं पातु मे शिरो नित्यं देवी भैं भद्रकाळिका |
ललाटं क्रीं सदा पातु महारत्नेश्वरी तथा || 1 ||

क्रीं भ्रुवौ पातु मे नित्यं महाकामेश्वरी तथा |
नेत्रेव्यात् क्रीं च मे नित्यं नित्यानंदमयी शिवा || 2 ||

गंडौ मे पातु भैं नित्यं सर्वलोकमहेश्वरी |
श्रुती ह्रीं पातु मे नित्यं सर्वमंगळमंगळा || 3 ||

नासां ह्रीं पातु मे नित्यं महात्रिभुवनेश्वरी |
अधरे हूं सदाव्यान्मे सर्वमंत्रमयी तथा || 4 ||

जिह्वां क्रीं मे सदा पातु विशुद्धेश्वररूपिणी |
भैं ह्रीं ह्रीं मे दंतान् पातु नित्या क्रीं कुलसुंदरी || 5 || [रदान्]

ह्रीं हूं क्रीं मे गळं पातु ज्वालामंडलमंडना |
ह्रीं हूं क्रीं मे भुजौ पातु भवमोक्षप्रदांबिका || 6 ||

ह्रीं हूं क्रीं मे करौ पातु सर्वानंदमयी तथा |
स्तनौ क्रीं हूं सदा पातु नित्या नीलपताकिनी || 7 ||

क्रीं भैं ह्रीं मम वक्षोव्यात् ब्रह्मविद्यामयी शिवा |
भैं कुक्षिं मे सदा पातु महात्रिपुरसुंदरी || 8 ||

ऐं सौः भैं पातु मे पार्श्वौ विद्या चतुर्दशात्मिका |
ऐं क्लीं भैं पातु मे पृष्ठं सर्वमंत्रविभूषिता || 9 ||

ॐ क्रीं ऐं सौः सदाव्यान्मे नाभिं भैं बैंदवेश्वरी |
ॐ ह्रीं हूं पातु शिश्नं मे देवता भगमालिनी || 10 ||

ह्रीं ह्रीं ह्रीं मे कटिं पातु देवता भगरूपिणी |
हूं हूं भैं भैं सदाव्यान्मे देवी ब्रह्मस्वरूपिणी || 11 ||

ॐ क्रीं हूं पातु मे जानू महात्रिपुरभैरवी |
ॐ क्रीं ऐं सौः पातु जंघे बाला श्रीत्रिपुरेश्वरी || 12 ||

गुल्फौ मे क्रीं सदा पातु शिवशक्तिस्वरूपिणी |
क्रीं ऐं सौः पातु मे पादौ पायात् श्रीकुलसुंदरी || 13 ||

भैं क्रीं हूं श्रीं सदा पातु पादाधः कुलशेखरा |
ॐ क्रीं हूं श्रीं सदाव्यान्मे पादपृष्ठं महेश्वरी || 14 ||

क्रीं हूं श्रीं भैं वपुः पायात् सर्वं मे भद्रकाळिका |
क्रीं ह्रीं ह्रीं पातु मां प्रातर्देवेंद्री वज्रयोगिनी || 15 ||

हूं भैं मां पातु मध्याह्ने नित्यमेकादशाक्षरी |
ॐ ऐं सौः पातु मां सायं देवता परमेश्वरी || 16 ||

निशादौ क्रीं च मां पातु देवी श्रीषोडशाक्षरी |
अर्धरात्रे च मां पातु क्रीं हूं भैं छिन्नमस्तका || 17 ||

निशावसानसमये पातु मां क्रीं च पंचमी |
पूर्वे मां पातु श्रीं ह्रीं क्लीं राज्ञी राज्यप्रदायिनी || 18 ||

ॐ ह्रीं हूं मां पश्चिमेव्यात्सर्वदा तत्त्वरूपिणी |
ऐं सौः मां दक्षिणे पातु देवी दक्षिणकाळिका || 19 ||

ऐं क्लीं मामुत्तरे पातु राजराजेश्वरी तथा |
व्रजंतं पातु मां श्रीं हूं तिष्ठंतं क्रीं सदावतु || 20 ||

प्रबुधं हूं सदा पातु सुप्तं मां पातु सर्वदा |
आग्नेये क्रीं सदा पातु नैर्ऋत्ये हूं तथावतु || 21 ||

वायव्ये क्रीं सदा पायादैशान्यां भैं सदावतु |
उर्ध्वं क्रीं मां सदा पातु ह्यधस्तात् ह्रीं तथैव तु || 22 ||

चौरतोयाग्निभीतिभ्यः पायान्मां श्रीं शिवेश्वरी |
यक्षभूतपिशाचादि राक्षसेभ्योवतात्सदा || 23 ||

ऐं क्लीं सौः हूं च मातंगी चोच्छिष्ठपदरूपिणी |
दैत्यभूचरभीतिभ्योऽवताद्द्वाविंशदक्षरी || 24 ||

विस्मरितं तु यत् स्थानं यत् स्थानं नामवर्जितं |
तत्सर्वं पातु मे नित्यं देवी भैं भद्रकाळिका || 25 ||

इतीदं कवचं देवि सर्वमंत्रमयं परं |
जगन्मंगळनामेदं रहस्यं सर्वकामिकं || 26 ||

रहस्याति रहस्यं च गोप्यं गुप्ततरं कलौ |
मंत्रगर्भं च सर्वस्वं भद्रकाळ्या मयास्मृतं || 27 ||

अद्रष्टव्यमवक्तव्यं अदातव्यमवाचिकं |
दातव्यमभक्तेभ्यो भक्तेभ्यो दीयते सदा || 28 ||

अश्रोतव्यमिदं वर्म दीक्षाहीनाय पार्वति |
अभक्तेभ्योपिपुत्रेभ्यो दत्वा नरकमाप्नुयात् || 29 ||

महादारिद्र्यशमनं महामंगळवर्धनं |
भूर्जत्वचि लिखेद्देवि रोचना चंदनेन च || 30 ||

श्वेतसूत्रेण संवेष्ट्य धारयेन्मूर्ध्नि वा भुजे |
मूर्ध्नि धृत्वा च कवचं त्रैलोक्यविजयं भवेत् || 31 ||

भुजे धृत्वा रिपून् राजा जित्वा जयमवाप्नुयात् |
इतीदं कवचं देवि मूलमंत्रैकसाधनं |
गुह्यं गोप्यं परं पुण्यं गोपनीयं स्वयोनिवत् || 32 ||

इति श्रीभैरवीतंत्रे श्री भद्रकाळी कवचं |